[A]नियमानः, इत्यादीनि सर्वाण्यपि रूपाणि भौवादिककिटतिवत् (190) ज्ञेयानि। अस्य धातोरुभयपदित्वात् नेदमानः, नेदयमानः, निनिदिषमाणः, निनेदिषमाणः, नेदिष्यमाणः, निनिदिषिष्यमाणः-निनेदिषिष्यमाणः; इति शानजन्तानि रूपाण्यधिकानीति विशेषः।

(676) "णिल गहने" (VI-तुदादिः-1360. अक.सेट्.पर.)

नेलकः-प्रणेलकः-लिका, नेलकः-लिका, निनिलिषकः-निनेलिषकः-षिका, नेनिलकः-लिका; [B]निलितम्-तः-तवान्, इत्यादीनि सर्वाण्यपि रूपाणि तौदादिककिलतिवत् (193) ज्ञेयानि।

(677) "णिवि सेचने" (I-भ्वादिः-590. सक. सेट्. पर.)

'सेवने' इति तरङ्गिण्याम्। 'स्रंसने' इति मैत्रेयः।

प्रणिन्वकः-[C]निन्वकः-न्विका, निन्वकः-न्विका, निनिन्विषकः-षिका, नेनिन्वकः-न्विका; इत्यादीनि सर्वाण्यपि रूपाणि भौवादिकजिन्वतिवत् (604) ज्ञेयानि।

(678) "णिश समाधौ" (I-भ्वादिः-722. अक. सेट्. पर.)

प्रणेशकः-शिका, नेशकः-शिका, निनिशिषकः-निनेशिषकः-षिका, नेनिशकः-शिका, इत्यादीनि सर्वाण्यपि रूपाणि भौवादिककिटतिवत् (190) ज्ञेयानि। निट्-निशौ-निशः, निशा,[1] इत्यस्याधिकानि रूपाणीति विशेषः।

(679) "णिसि चुम्बने" (II-अदादिः-1025. सक. सेट्. आत्म.)

[2]प्रणिंसकः-प्रनिंसकः-सिका, निंसकः-सिका, निनिंसिषकः-षिका,

---

1. 'सम्पदादिभ्यः क्विप्' (वा. 3-3-94) इति भावे स्त्रियां क्विप्। 'आपं चैव हलन्तानां यथा वाचा निशा दिशा॥' इति वचनेन टापि निशा इति भवति।
2. 'वा निंसनिक्षनिन्दाम्' (8-4-33) इति कृत्प्रत्ययपरकस्य धातुनकारस्य णत्वविकल्पः।

A. 'नित्यं प्रमोदामिदितोरुमेदैः प्रमेधिता सद्भिरनिद्यमानैः।' धा. का. 2.26.
B. 'बिलशयप्रतिमैर्निलिते पुरे स हि सुहृत्सु हिलन् अचरत् सुखम्।' धा.का. 2.79.
C. 'विश्वेन्वितं सङ्मधुपिन्वितानं मिन्वन्तमुच्चैः कृपयैव निन्वकान्।' धा.का. 1.75.